
ISSN 0975-4067

# KIRAṆĀVALĪ

## Journal of Sanskrit Research Foundation

The New Trivandrum Sanskrit Series
Vol.XIV, Book. III -IV

JULY - DECEMBER 2022



SRFT

किरणावली
Sanskrit Research Foundation
Thiruvananthapuram

# KIRAṆĀVALĪ

## Journal of Sanskrit Research Foundation



### Editor

**Prof. Dr.M. Manimohanan**
Sree Sankaracharya University of Sanskrit, Kalady
dr.m.manimohanan@gmail.com

### Executive Editor

**Prof. Dr.C.S.Sasikumar (Rtd.)**
Sree Sankaracharya University of Sanskrit, Kalady
**drsasikumarcs@gmail.com**

### Managing Editor

**Prof. Dr.G.Narayanan**
Sree Sankaracharya University of Sanskrit, Kalady
dr.g.narayanan@gmail.com

### Editorial board

Dr.V.Sisupalapanikkar,Professor of Sanskrit(Rtd.) Uty. of Kerala
Dr.R.Vijayakumar, Professor of Vyakarana(Rtd.), S.S.U.S.Kalady
Dr.K.Muthulakshmi, Professor of Vedanta, S.S.U.S. Kalady
Dr.K.K.Sundaresan, Associate Professor in Vedanta, SSUS.Kalady
Dr.P.K.Dharmarajan, Professor of Sahitya, (Rtd) S.S.U.S. Kalady
Dr.S.Sobhana, Professor of Vedanta (Rtd), S.S.U.S.Kalady
Dr.T.Devarajan, Professor of Sanskrit (Rtd), University of Kerala
Dr.P.Chithambaran, Professor of Vedanta (Rtd),S.S.U.S. Kalady

### Associate Editor

**Dr.R.Jinu**
dr.rjinu@gmail.com

# *Contents*


The tantric concept in "Vātāpi Gaṇapatiṁ bhaje"-A study
Dr.Pradeep Varma.P.K 7

Śākta Brahmins of Kerala and their rituals with esoteric and exoteric dimensions
Dr. Ajithan. P. I 14

Lanka's Princess as an Art of Reclaiming Beauty
Dr. M S Gayathri Devi 37

Role of Ayurveda in Geriatric Nutrition
Dr. Gopikrishnan P. T., ,Dr. Haritha Chandran, Dr. Haroon Irshad 51

Manuscriptology: An Overview -
Dr. Keerthi P, Prof. Ramadas P.V. Dr. Haritha Chandran, Dr. Leena P.Nair 58

Spell Checker for Sanskrit Sentences based on Morphological Analysis-
Dr. Namrata Tapaswi 66

Appreciation of Muttusvami Dikshitar's Navāvaraṇa Kṛti in the Raga Śankarabharanam. -
Mr. Ratheesh P R 77

A Reference Frame for Self-Studies and Self-Regulatory Mechanism of Vedas: Personality Changes - [Swami Parmarth Dev, Sadvi Dev Priya, Anjali Prabhakar and Paran Gowda] 85

Taxation in Dharmaśāstra - Dr. Tarak Jana 100

Developmental Stages of *Camatkāra* in Sanskrit Poetics
Dr. Sudip Chakravortti 114

Elevating the modern educational experience: Correlating 'Practical Vedanta' and 'Bratacārī' - Dr Anusrita Mandal 124

Dharma: The Bed Rock of Social Philosophy of Renaissance Thinkers of Kerala. -
Rakesh. K 134

The Concept of Pratibhā and its Implications; Gleanings from Vākyapadīya -
Dr. Sarath P Nath 144

Vaijayantīkośa- Nature and Methodology- Athira.T 153

Analytical study of Śabda - Dr.N.S.Sharmila 167

Temple architecture: Classification and characteristics
Dr S Radhakrishnan 173

Knowledge of the Heart in Ādi Śaṅkarācārya's Upaniṣad Commentary
Jyothi. L 181

The Tradition of Nyaya in Kerala - Niveditha Sathyan 187

Drona: The Practitioner of Injustice - Dr. G. Reghukumar 195

Karma Yoga Concept in Shrimad Bhagavad Gita: A Conceptual Frame Development - Anjali Prabhakar and Paran Gowda 202

Śrī Jagannāth and Vaiṣṇavism - Dr.Nilachal Mishra 211

Morals and Teaching of Values for Human Being in Shrimad Bhagavad Gita -
Ramesh Kumar Awasthi 217

Status of Women Depicted in Manusmriti - Dr. Shylaja S 223
Authoritative Works on Rāja Yoga - A Brief Reflective Sunitha S. 235
Rig Veda and Astronomy - Girish V. 242
Traces of Śivadharma and Śivadharmottara in the Śaiva Scriptures of Odisha - Dr. Anil Kumar Acharya 247
तत्त्वशास्त्रे चित्सुखप्रकाशितं स्वप्रकाशत्वमित्यद्वैततत्त्वम् - डा.सि.आर् सन्तोष् 260
श्रीहरिनामामृतपाणिनीयव्याकरणयोरच्सन्धिप्रकरणस्य तुलनात्मकमध्ययनम् डॉ.प्रीतिलक्ष्मी स्वाईं 271
कुमारसम्भवस्य तिङन्तपदानि - मल्लिनाथीयविवेचनम् - विश्वबन्धु उपाध्याय: 278
योगवासिष्ठरामायणे शास्त्रव्याख्यानकौशलविमर्शः- अमृता घोषः 282
उपनिषदि ब्रह्मस्वरूप-विमर्शः अम्बरीष दासः 289
रसगङ्गाधरे नव्यन्यायभाषाशैली डा. के . रतीष् 294
धातुवृत्तयः धातुकोशाश्च डॉ. जयदेवदिण्डा 298
वाक्यपदीये वाक्यस्वरूपम् ड० मलयपोडे 312
मनुसंहितालिखितायां समाजव्यवस्थायां नारीणां पदम् : दूषणं तत्प्रतिकारश्च प्रशान्त कर्मकार् 320
वैयाकरणमतमनुसृत्य प्रतिभास्वरूपविचारः डा॰ राजीवः पी.पी 329
ज्योतिर्गणितपद्धतीनां परिचयः डा. हरिनारायणन् 334
अद्वैतनयेसत्तास्वरूपविमर्शः डा. निषाद् टि.एस् 339
भवभूतेर्कृतिषु सांख्ययोगमीमांसादर्शनतत्त्वानामन्वेषणम् - डा॰ तानिया सिकदार 342
पाणिनीयव्याकरणे सूत्राणामेकवाक्यताविमर्शः - डॉ.मनीषकुमारझाः 347
सर्वङ्कषाटीकायां व्याकरणालोचने मल्लिनाथस्य कतिपयाऽनवधानता - मृत्युञ्जयगराँइ 354
परमपुरुषार्थसिद्धये भक्तिमार्गः शुभाङ्कर बसकः 361
कातन्त्रव्याकरणसूत्रपरिचयः डा॰टि.वि गिरिजा 367
अष्टाध्याय्यां विभाषाधिकारेऽपि नित्यसमासविधानम् पङ्कजराउलः 370
अलुक्समासविमर्शः राजकुमार-मण्डलः 374
मधुसूदनसरस्वतीप्रणीते कृष्णकुतूहले भक्तिरसविमर्शः - रिक्ता मण्डलः 380
जैनरीत्या बौद्धसम्मतप्रमाणलक्षणसमीक्षणम् - श्रीशशांकशेखरपात्रः 388
जनकल्याणे नीतिशतकस्य माहात्म्यम् समीरणः रायः 396
विभावना-विशेषक्तयोः समीक्षात्मकपर्यालोचनम् शान्तनुः प्रधानः 401
संस्कृतव्याकरणदिशा ओडिआभाषायाः समीक्षणम् - शिवानन्द बेहेरा 403
आचार्यधर्मकीर्तिकृतविविधसम्बन्धस्वरूपदूषणं तन्निराकरणञ्च - सुजन-दासः 409
कादम्बरीहर्षचरितयोर्बाणभट्टस्य काव्यसौन्दर्यम्- प्रो. प्रसूनदत्तसिंहः, सुपर्णा सेनः 414
शिवसङ्कल्पः स्वरूपश्च पौराणिकग्रन्थेषु डा.बिन्दुश्री के.एस् 419
न्यायसिद्धान्तमुक्तावल्यनुसारेण शब्दप्रमाणनिरूपणम् - अश्वति एस् 422
वराहमिहिरस्य जीवचरितम् - बि. नागराजः, डा. यादव 429
उपनिषद्ग्रन्थेषु पर्यावरणम्- एकमध्ययनम् डा॰ गोबिन्दसर्कार 432
रामायणमहाकाव्ये मोक्षस्य अवधारणा तरणीकुमारपण्डा 437
अक्षपाददर्शनम् डा. एस्. शिवकुमारः 445
सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः डा.अरविन्दमहापात्रः 451
Submission & Subscription 460

# *जनकल्याणे नीतिशतकस्य माहात्म्यम्*

**समीरणः रायः**[1]

काव्यस्य साहित्यस्य वा मूलभूते प्रयोजने द्वे, अलौकिकानन्दानुभूतिः शिक्षा च। मनुष्याणां सर्वतः उन्नतेः प्रयत्नस्य पूर्णप्रतिफलनं संस्कृतसाहित्ये परिलक्ष्यते। प्राचीनभारतीयसभ्यतायाः संस्कृतेश्च समुन्नायको वेदवेदाङ्गादिः शास्त्रम्। मनुष्यजीवनस्य उत्कर्षः अपकर्षश्च एतेषां शास्त्राणामुपरि आधारितः। अस्मिन् मनुष्यजीवने केन सह कीदृशः व्यवहारः काङ्क्षितः, किं कर्तव्यम्, किमकर्तव्यम्, कः सन्मार्गः, कण्टकाकीर्णः मार्गः कः, कस्मात् आदर्शजीवनस्य प्राप्तिर्भवति – एतेषां प्रश्नानां निश्चितं निराकरणमस्ति नीतिशास्त्रे। कविना भर्तृहरिणापि शतकत्रये स्फुटतया अनुरूपः प्रयासः क्रियते। शतकत्रयान्तर्गतः शृङ्गारशतकं व्यक्तिजीवनेन सह, वैराग्यशतकं परमार्थजीवनेन सह तथा नीतिशतकं सामाजिकजीवनेन सह सम्बन्धयुक्तम्। शतकत्रयं मूलतः सत्य-शिव-सुन्दरतत्त्वं समन्वितम्। संस्कृतवाङ्मये शुक्र-विदुर-चाणक्य-भर्तृहरिप्रणीतेषु नीतिग्रन्थेषु भर्तृहरेः नीतिशतकस्य विशिष्टमेकं स्थानं वर्तते। अपूर्वेऽस्मिन् नीतिग्रन्थे कविना संसारस्य व्यवहारिकजीवनस्य सकलगूढं महत्त्वपूर्णं च विषयं चित्रितम्। नीतिशतके मनुस्मृतिः इव शिक्षा, महाभारतमिव उपदेशः, पुराणमिव रसास्वादनम्, दर्शनशास्त्रमिव तर्कयुक्तिः उपलभ्यते। मानवकल्याणे नीतिशतकोक्तनैतिकशिक्षायाः माहात्म्यमस्य शोधप्रबन्धस्य आलोच्यविषयः।

नी(प्रापणे/नये) धातोः उत्तर क्तिन् प्रत्यययोगे नीतिः शब्दो निष्पद्यते। कोशकारगणः विभिन्नेषु अर्थेषु शब्दस्यास्य प्रयोगं कृतवान्। यथा – निर्देशनम्, दिग्दर्शनम्, प्रबन्धः, आचारः, आचरणम्, आचारशास्त्रम्, व्यवहारः, कार्यक्रमः, औचित्यम्, नीतिकौशलम्, नीतिशास्त्रम्, शालीनता, बुद्धिमत्ता, योजना, उपायः, कूटनीतिः, राजनयः, अवाप्तिः, अधिग्रहणमित्यादयः। अतएव सकलप्रयोजनस्य सिद्धिदातृ एव नीतिशास्त्रम्। उच्यते च – "सर्वस्य लोचनं शास्त्रं नीतिविद्यां ददाति च।" नीतिशास्त्रस्य व्यवहारात् ऋते संसारस्य कोऽपि मनुष्यः सुखपूर्वकं जीवनयापयितुं समर्थो न भवति। नीत्याश्रयेण नराः सांसारिकसमस्यायाः समाधानं कर्तुं शक्नुवन्ति। नीतिवेत्ता व्यक्तिः कठिनतरकार्यमपि अनायासेनैव सम्पादयति, परन्तु नीतिहीनव्यक्तिः न कदापि साफल्यम् आप्नोति। अस्मिन् प्रसङ्गे महाकविकालिदासस्य रघुवंशमहाकाव्यस्य उक्तिः स्मरणीया – "काले खलु समारब्धाः फलं बध्नन्ति नीतयः।" (१२,६९) नीतिशतकं मुक्तकश्रेण्याः शतककाव्यम्। नामकरणानुसारेण अस्य शतसंख्यकश्लोकं काङ्क्षितं परन्तु अपरापरं शतककाव्यमिव अस्य ग्रन्थस्यापि श्लोकसंख्याविषये मतभेदं परिदृश्यते। नीतिशतकस्य प्रणेता सप्तमशतकस्य महाकविः

---

1 Samiran Ray, Assistant Professor, Department of Sanskrit, Gushkara Mahavidyalaya, Post - Gushkara. Dist - Purba Bardhaman.,Pin Code - 713128. West Bengal, Email-samiranray.ju@gmail.com

भर्तृहरिः। उपदेशस्य कार्यकारिता अतीवं स्वल्पमिति ज्ञात्वापि मानवकल्याणस्य महत्यां चिन्तायाम् उद्बुद्धं भूत्वा कविः स्वस्य भावनानां काव्यरूपं विदधाति नीतिशतकस्य सूक्तिरत्नावल्याम्। कवि-वैयाकरण-दार्शनिक-भर्तृहरेः नीतिशतकं काव्यं, जीवनदर्शनं, समाजविद्या, राजनीतिः मनुष्यस्य निर्वाणतन्त्रं च।

पाश्चात्यधारणायाः अनुप्रवेशात् प्राच्यस्य स्वकीयं वैशिष्ट्यमधुना अस्तित्वसंकटापन्नम्। विश्वायनयुगेऽस्मिन् जीवनस्य प्रतिक्षेत्रे पाश्चात्यमनुकरोति। अस्माद्धेतोः भावी जातकः आख्यानोपाख्यानेन भारतवर्षं ज्ञास्यति। एतत्तु नाभिप्रेतम्। समाजशास्त्रं जातेः धारकं वाहकञ्च। विषयान्तरानामिव प्राच्य-पाश्चात्ययोः समाजशास्त्रेष्वपि भेदमस्ति। एतद् भेदं खलु उपाये न तु उद्देश्ये। पाश्चात्यसमाजवादानुसारेण व्यक्तिः परिस्थितिहेतोः स्वयमेव नैतिकतायाः अवलम्बनं करोति। अतो व्यक्तिकेन्द्रिका चिन्ता वृथा। परन्तु प्राच्यसमाजशास्त्रे व्यक्तेः गुरुत्वमधिकम्। व्यक्तिमतिक्रम्य नैतिकतायाः स्थानं सर्वोच्चम्। अर्थात् भारतीयशास्त्रं नीतिसम्पन्नैः मनुष्यैः समाजगठनस्य विधानं कृतवान्। तत्र न्यायपरता एव सर्वस्य मनुष्यस्य मूल्यायनाधारः। न्यायपरायणः एकः व्यक्तिः सामूहिकपशुवलविरुद्धे सहजेनैव साफल्यं प्राप्नोति। संसारस्य गुरुभारवहनाय सर्वदा स्कन्धपरिवर्तनम् आवश्यकम्। कालो हस्तगतो वयम्। कालनियमात् वयोवृद्धस्कन्दम् अव्याहतिं दत्त्वा युवस्कन्धैः अग्रसरणीयम्। अतो युवनो नैतिकतायाः सुदृढभित्त्यां स्थापनं संसारस्य प्रथमकर्तव्यम्।

मानवः केन प्रकारेण सज्जीवनं लब्धुं शक्यते तस्योपायं भर्तृहरेः नीतिशतके वर्णितमस्ति। नीतिशतकानुसारेण व्यक्तेः सर्वप्रथमं लक्ष्यमेव अहङ्कारस्य दूरीकरणम्। केवलं विद्वानव्यक्तेः सत्सङ्गेनैव तत् सम्भवम्। अल्पज्ञतामेव अहङ्कारस्य कारणम्, अस्याः नाशेन मनुष्यस्य सुख-शान्त्योः उपलब्धिर्भवति। यैः सह प्रतिनियतं संसर्गो भवति तेषां स्वभावप्रभवो मानवानां चरित्रेषु सर्वदैव लक्ष्यन्ते। ये धार्मिकाणां जनानां सङ्गं भजन्ति ते प्रायेण धार्मिका एव भवन्ति। ये तु पापिनां संसर्गे विचरन्ति ते पापिन एव सञ्जायन्ते। यथा सत्सङ्गफलेन चरित्रं निर्मलं भवति कल्याणं च लभते, तथा असत्सङ्गदोषेण चरित्रं कलुषितं भवति, महाननर्थोऽपि समुत्पद्यते। सत्सङ्गः न केवलं जनानां बुद्धिमान्द्यं हरति अपि तु सत्यतां वर्धयति, सम्मानं प्रददाति, पापकर्मणः निवार्य पुण्यं वर्धयति, चित्तं प्रसादयति दिक्षु च यशः प्रसारयति। नीतिशतकस्य उक्तिरियं विश्वसाहित्ये अतुलनीया –

"यदा किंचिज्ज्ञोऽहं द्विप इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किंचित् किंचिद् बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥" (नीतिशतकम्, ८)

शतकेऽस्मिन् कविभर्तृहरिः मूर्खनिन्दां कृतवान्। तस्य मते मूर्खस्य कर्माणि यथा तस्मै विनाशकारकाणि तथा समग्रविश्वाय समस्याजनकानि। मूर्खव्यक्तयः कदापि न प्रसन्नं भवन्ति, अतः मूर्खजनस्य चित्ताराधनाय न प्रयतेत। संसारस्य सकलसमस्यायाः शास्त्रोक्तं समाधानं विद्यमानम्, परन्तु मूर्खं यथार्थमार्गे आनयनाय न किमपि औषधं शास्त्रे उल्लिखितम् –

"सर्वस्यौषधमस्ति शास्त्रविहितं, मूर्खस्य नास्त्यौषधम्।"(नीतिशतकम्, ११)

मूर्खसङ्गमपि सर्वदा त्यक्तव्यम् –

"वरं पर्वतदुर्गेषु भ्रान्तं वनचरैः सह।
न मूर्खजनसंपर्कः सुरेन्द्रभवनेष्वपि॥" (नीतिशतकम्, १४)

निष्ठुरता, अकारणात् कलहः, परस्त्री-धनयोर्कामना, स्वजनमित्रेण सह ईर्षाभावः इत्यादयः एव खलस्य स्वभावाः। दुर्जनसंसर्गमपि परिहर्तव्यम्। दुर्जनस्य लक्षणप्रसङ्गे भर्तृहरिः आह –

"अकरुणत्वमकारणविग्रहः,
परधने परयोषिति च स्पृहा।
सुजनबन्धुजनेष्वसहिष्णुता,
प्रकृतिसिद्धमिदं हि दुरात्मनाम्॥" (नीतिशतकम्, ५२)

उग्रक्रोधसम्पन्नव्यक्तेः न कोऽपि आत्मीयो भवति। अतः क्रोधोऽपि सर्वथा परिहरणीयम्। यतः कविना उक्तम् –

"न कश्चिच्चण्डकोपानामात्मीयो नाम भूभुजाम्।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः॥" (नीतिशतकम्, ५७)

संसारोऽयं कर्मफलाधीनः। प्रत्येकव्यक्तेः विचारपूर्वकं कार्यं करणीयम्। विपदां सम्भवनाम् अवगम्य प्रागेव तत्प्रतीकारार्थं यतितव्यम्। कविनोच्यते – "विवेकभ्रष्टानां भवति विनिपातः शतमुखः।" (नीतिशतकम्, १०) न केवलं मनुष्यलोके, कर्मणः राज्यं स्वर्गलोकेऽपि विस्तृतम्। संसारस्य सृष्टि-पालन-विनाशकर्तारो देवाऽपि कर्माधीनाः। अतएव कर्म एव मुख्यः। कविदृष्ट्यां संसारोऽयं कर्मभूमिः, अत्रागतस्य मनुष्यस्य उत्तमकर्मं सम्पादनीयम्। तपः काङ्क्षितम्। तपो नाम निष्कामकर्म तथा कर्तव्यकर्म। सत्कर्मविमुखं मूर्खतायाः नामान्तरम्। पूर्वकृतः उत्तमकर्म एव सर्वत्रं मनुष्यं रक्षति। नीतिशतककारः आह –

"भीमं वनं भवति तस्य पुरं प्रधानं,
सर्वो जनः सुजनतामुपयाति तस्य।
कृत्स्ना च भूर्भवति सन्निधिरत्नपूर्णा,
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य॥" (नीतिशतकम्, १०२)

वाधायाः आगमने सत्यपि कर्मसमापने एव विरामं काम्यम्, उत्तमनरस्य स्वभावः एवैष – "प्रारब्धमुत्तमजना न परित्यजन्ति।" (नीतिशतकम्, २७)

नीतिशतककारो धनस्य गुरुत्वमपि अङ्गीकरोति। सकलप्रकारा गुणाः काञ्चनमाश्रयन्ति – "सर्वे गुणाः काञ्चनमाश्रयन्ति।" (नीतिशतकम्, ४१) सर्वगुणसम्पन्नेऽपि निर्धनो नादरं लभते, धनिकस्य नैकगुणोऽपि युज्यते। यथा सद्गुणं तथा अर्थोपार्जनमपि अभिप्रेतम्। अर्जितार्थस्य प्रकृष्टतमो व्यवहारः एव दानम्। अनेन इह जगति यश आत्मप्रसादश्च लभ्येते। तदनन्तरं भोगम्। द्वयोः अवर्तमाने अर्थः तृतीयदशां नाम विनाशं प्राप्नोति। धनप्राप्तिमपि भाग्यायत्तम्।

सर्वश्रेष्ठं धनमेव विद्याधनम्। अर्थो विद्वानं वशीकर्तुं न शक्नोति। श्रेष्ठं सौन्दर्यं, सुगुप्तं धनं, विदेशे परमबान्धववत् सहायिका सर्वोत्तमा देवता च विद्यैवास्ति। राजसभायां विद्या एव समादृता। सहृदयहृदयह्लादिनी कविता यद्यस्ति तर्हि राजलक्ष्म्याः किमपि प्रयोजनं नास्तीति – "सुकविता यद्यस्ति राज्येन किम्।" (नीतिशतकम्, २१) विद्याविहीनव्यक्तिः पशुतुल्यः –

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्,
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते नहि धनं विद्याविहीनःपशुः ॥"(नीतिशतकम्, २०)

साहित्य-सङ्गीत-कलाविहीन-मनुष्यः शृङ्गपुच्छविहीनपशुः इति भर्तृहरिणा मन्यते – "साहित्यसङ्गीतकलाविहीनः साक्षात्पशुः पुच्छविषाणहीनः।" (नीतिशतकम्, १२) विद्या-तपस्या-दान-सदाचार-ज्ञान-सद्गुण-धर्मविहीनानां मनुष्याणां जन्म जगति निरर्थकमेव, ते एव संसारस्य भारस्वरूपाः पशुतुल्याश्च।

सर्वेषु दीनता अप्रकटनीयम्। दुस्तरमेव सेवाकार्यम्। योगीगणोऽपि अस्मिन्विषये ज्ञातुं न शक्नोति – "सेवाधर्मः परमगहनो योगिनामप्यगम्यः।" (नीतिशतकम्, ५८) अतः काठिन्यं सम्यक् ज्ञात्वा सेवाकर्मणि प्रवर्तितव्यम्। लिप्सा परित्यज्या। आलस्यं तु देहान्तर्गतो रिपुः, उद्योगसमो बन्धुर्नास्ति। अतः आलस्यं विहाय सोद्योगेन सर्वदा कार्यकरणीयम्। भाग्याधिष्ठात्री देवी लक्ष्मीः सदैव उद्योगशीलं पुरुषं प्रति सदया भवति। व्यक्त्यां शील-दृढप्रतिज्ञ-धैर्य-वीरत्वादीनां गुणानामुपस्थितिः वाञ्छनीयः।

सज्जनाः सन्तोषजनकां न्याययुतां जीविकाम् आश्रयन्ति, प्राणान्तकालेऽपि निन्द्यकर्म न कुर्वन्ति, विपद्यपि स्वमर्यादां रक्षन्ति, महाजनपन्थानमनुसृत्य च तिष्ठन्ति –

"क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्राणोऽपि कष्टां दशा-
मापन्नोऽपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबन्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी॥" (नीतिशतकम्, २९)

सत्सङ्गेऽभिलाषः, अपरस्य गुणे प्रेम, गुरुजनं प्रति सम्मानं, विद्यायामभिरुचिः, स्वधर्मपत्न्यां स्नेहः, लोकापवादे भयम् – एतादृशः गुणसम्पन्नः पुरुषः आदरणीयः। विपदि धैर्यं, समृद्ध्यां क्षमा, सभायां वाग्मिता, रणाङ्गने विक्रमः, यशेऽभिलाषः, शास्त्रे प्रवृत्तिः इत्यादयः गुणाः महात्मनां प्रकृतिसिद्धम्। अतीव कठिननिर्वाहोऽयं सज्जनानां नियमः। एवंविधा विचित्रचरित्राः सज्जनाः जगति केषां न मानार्हा भवन्ति। कविना भर्तृहरिणा सन्मित्रस्य लक्षणमपि अङ्कितम् –

"पापान्निवारयति, योजयते हिताय,
गुह्यं निगूहति, गुणान्प्रकटीकरोति।
आपद्गतं च न जहाति, ददाति काले,
सन्मित्रलक्षणमिदं प्रवदति सन्तः॥" (नीतिशतकम्, ७६)

भर्तृहरिः स्वस्य नीतिशतकग्रन्थे कदापि लोकमर्यादां न उल्लङ्घयति। धर्मस्य मर्यादामपि रक्षति। दुर्जनैः सह दूरत्वम्, सज्जनैः सह सहावस्थानम्, धनस्य महत्त्वम्, मान-मर्यादायाः रक्षा, विद्यारत्नं महाधनम्, शीलस्य रक्षणम्—भर्तृहरिनीतेः प्रमुखघटकाः। धनस्य व्यवहारिकोपयोगितां प्रति सः विशेषगुरुत्वं ददाति। कस्यापि नरस्य सर्वे गुणे नष्टे सति यदि धनमस्ति तर्हि सः सर्वत्र पूजितः। सर्वगुणसम्पन्ननिर्धनजनः नादरणीयः। विजयलाभाय धनवलम् अत्यावश्यकम्। किन्तु सर्वेषु धनेषु विद्याधनं मुख्यम्। विद्या मानवान् विनयादिभिः समलङ्करोति। नीतिशतके यथा धनस्य माहात्यं भणितम्, अपरं तु विद्यामहाधनस्य सर्वोच्चस्थानमङ्गीकृतम्। अधुनापि भर्तृहरेः कथनं महत्त्वपूर्णम्। यस्य राष्ट्रस्य अर्थ-ज्ञानवलमस्ति तस्य राष्ट्रस्यैव कीर्त्तनं करोति विश्वम्।

नैतिकमर्यादायाः पालनं मनुष्यकर्तव्यम्। विश्वभ्रातृत्ववोधेन सर्वकल्याणं तथा हितचिन्तनमेव नैतिकमर्यादायाः रक्षणम्। भर्तृहरिमते दुर्जनस्य असत्मार्गात् सत्मार्गगमनमसम्भवम्। अमृतमधुराभिः सदुक्तिभिः यः खलान् वशीकर्तुं प्रयत्नं करोति स जनः मन्ये स्वस्य नैतिककर्तव्यं

हन्ति। आत्मनः दुर्वलव्यक्तिं प्रति वैरीभावस्य पोषणमपि नैतिकतायाः हननम्।

यदि मनुष्ये औदार्यमस्ति तर्हि तस्य सामाजिकं नैतिकस्तरञ्च उच्चः भवति, सः सेवायोग्यः भवति। सेवाकार्यं परोपकारस्यान्तर्गतम्। धनानि प्राणांश्च परोपकाराय एव उत्सृजेत्। कर्णस्य भूषणं शास्त्रश्रवणम्, करस्य दानम्, शरीरस्य परोपकारमेव। सर्वकारणमिदं शीलं सर्वेषामपि परं भूषणम्।

वस्तुतः नीतिशतकरचनायाः मूलभूतः उद्देश्यः एव जगत्कल्याणम्, एतत्तु सार्वजनीनं सर्वकालिकञ्च। विशेषतः वैश्वीकरणयुगे नीतिशतकस्य उपयोगिता ग्राह्यता च अधिकतरं प्रासङ्गिकं प्रतीयते। गीता, उपनिषद् इव गम्भीरतत्त्वसमन्वितग्रन्थः यूनः प्रेरणादाने अक्षमः। अपरं तु उद्रेकपूर्णयुवहृदये सहजेनैव प्रविष्टा भर्तृहरिः प्रेरणादाने समर्थो भवति। भारतवर्षस्य माध्यमिके तथा उच्चशिक्षालये भर्तृहरेः नीतिशतकम् अवश्यपाठ्यग्रन्थरूपेण गणयित्वा शिक्षादानं काङ्क्षितम्। विद्यार्थीगणाः शैशवादेव यदि भर्तृहरेः सकलश्लोकस्य मर्मार्थः हृदयङ्गमं कृत्वा तदनुरूपमाचरन्ति तर्हि गौरवमयराष्ट्रस्य निर्माणं सम्भविष्यति।

## *ग्रन्थसूची*

नीतिशतकम्, भर्तृहरि, सम्पादक जनार्दनशास्त्री पाण्डेय, मोतीलाल बनारसीदास, दिल्ली, २०१८।

*The* Nīti *and Vairāgya S'atakas of Bhartṛhari,* Ed. M.R.Kale, M.L.B.D., 2018.

KIRAṆĀVALĪ
Journal of Sanskrit Research Foundation
The New Trivandrum Sanskrit Series Vol. XIV.
Book III-IV
JULY – DECEMBER 2022

ISSN 0975-4067

kiranāvali
9 770975 406008 >

Printed and published by: Dr.C.S.Sasikumar, Secretary, Sanskrit Research Foundation, Thiruvananthapuram, for Sanskrit Research Foundation, Thiruvananthapuram-36
Sanskritresearchfoundation@gmail.com